श्री आदिशेष स्तवं

श्री आदिशेष स्तवं

श्रीमद्विष्णुपदांभोज पीठायुत फणातलं |
शेषत्वैक स्वरूपं तं आदिशेषमुपास्महे || 1 ||

अनंतां दधतं शीर्षैः अनंतशयनायितं |
अनंते च पदे भांतं तं अनंतमुपास्महे || 2 ||

शेषे श्रियःपतिस्तस्य शेषभूतं चराचरं |
प्रथमोदाहृतिं तत्र श्रीमंतं शेषमाश्रये || 3 ||

वंदे सहस्रस्थूणाख्य श्रीमहामणिमंडपं |
फणा सहस्ररत्नौघैः दीपयंतं फणीश्वरं || 4 ||

शेषः सिंहासनी भूत्वा छत्रयित्वा फणावळिं |
वीरासनेनोपविष्टे श्रीशेऽस्मिन्नधिकं बभौ || 5 ||

पर्यंकीकृत्य भोगं स्वं स्वपंतं तत्र माधवं |
सेवमानं सहस्राक्षं नागराजमुपास्महे || 6 ||

शरदभ्ररुचिः स्वांक शयित श्यामसुंदरा |
शेषस्य मूर्तिराभाति चैत्रपर्व शशांकवत् || 7 ||

सौमित्री भूय रामस्य गुणैर्दास्यमुपागतः |
शेषत्वानुगुणं शेषः तस्यासीन्नित्यकिंकरः || 8 ||

अत्त्वालोकान् लयांबोधौ यदा शिशयिषुर्हरिः |
वटपत्रतनुः शेषः तल्पं तस्याभवत्तदा || 9 ||

पादुकीभूत रामस्य तदाज्ञां परिपालयन् |
पारतंत्र्येऽति शेषे त्वं शेष तां जानकीमपि || 10 ||

चिरं विहृत्य विपिने सुखं स्वपितुमिच्छतोः |
सीताराघवयोरासेदुपधानां फणीश्वरः || 11 ||

देवकीगर्भमाविश्य हरेस्त्रातासि शेष भोः |
सत्संतानार्थिनस्तस्मात् त्वत्प्रतिष्टां वितन्वते || 12 ||

गृहीत्वा स्वशिशुं याति वसुदेवे व्रजं द्रुतं |
वर्ष त्री भूय शेष त्वं तं रिरक्षिषुरन्वगाः || 13 ||

प्रसूनद्भिः फणारत्नैः निकुंजे भूय भोगिराट् |
राधामाधवयोरासीत् संकेतस्थानमुत्तमं || 14 ||

भगवच्छेषभूतैस्त्वं अशेषैः शेष गीयसे |
आदिशेष इति श्रीमान् सार्थकं नाम ते ततः || 15 ||

अनंतश्चास्मि नागानां इति गीतासु सन्नुतः |
अनंतोऽनंतकैंकर्य संपदाप्येत्यनंत तां || 16 ||

अहो विविधरोऽप्येषः शेषः श्रीपति सेवनात् |
सहस्रशीर्ष्णोऽनंतोऽभूत् सहस्राक्षः सहस्रपात् || 17 ||

हरेः श्रीपाद चिह्नानि धत्ते शीर्षैः फणीश्वरः |
चिह्नानि स्वामिनो दासैः धर्तव्यानिति बोधयन् || 18 ||

अनंत सेविनः सर्वे जीर्णां त्वचमिवोरगः |
विमुच्य विषयासक्तिं शेषत्वे कुर्वते रतिं || 19 ||

श्री श्रीशनाय साहस्रीं युगपत्परिकीर्तयन् |
सहस्रवदनः शेषो नूनं द्विरसनोऽभवत् || 20 ||

अन्योन्य वैरमुत्सृज्य फणीश्वर खगेश्वरौ |
शयनं वाहनं विष्णोः अभूतां त्वत्पदाश्रयौ || 21 ||

वपुः शब्दमनोदोषान्विरस्य श्रुतिगोचरं |
दर्शयंतं परब्रह्मं तं शेषं समुपास्महे || 22 ||

शेषतल्पेन रंगेशः शेषाद्रौ वेंकटेश्वरः |
हस्ति काळेश्वरः शेष भूषणेन विराजते || 23 ||

भवत्पादुकात्वं ते महत्त्वा पादुको गुणः |
शिरसा धारयंति त्वां भक्त्या शेषयः स मे || 24 ||

भागवत शेषतायाः महत्त्वमावेदयन्नयं शेषः |
गुरुरस्य वामपादे विष्णोर्वाहस्य वीरकटकमाभूत् || 25 ||

शेषः पीतांबरं विष्णोः तद्विष्णुधृतमंबरं |
शेषवस्त्रमिति ख्यात्या भक्त सम्मान्यतां गतं || 26 ||

दुर्मतिं जननीं त्यक्त्वा श्रीपतिं शरणं गतः |
तेन दत्त्वाभयोऽनंतः तस्यासेन्नित्यकिंकरः || 27 ||

गर्गाय मुनये ज्योतिर्विद्यां यः समुपादिशत् |
देवर्षिगणसंपूज्यं तं अनंतमुपास्महे || 28 ||

वंदेऽनंतं मुदाभांतं रुचा श्वेतं सुरार्चितं |
हरिपादाब्ज शरणं तदीयास्याब्ज तोषणं || 29 ||

श्रीमते विष्णुभक्ताय शंखचक्रादिधारिणे |
वारुणी कीर्ति सहितायानंतायास्तु मंगळं || 30 ||

इमं स्तुतिं अनंतस्य भक्त्या नित्यं पठंति ये |
सर्पबाधा न तेषां स्यात् पुत्रिणः स्युः हरेः प्रियाः || 31 ||

इति श्रीआदिशेष स्तवं ||